# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा –एप्रिल - 2019

**कक्षा – आचार्य (SEM-2)** **प्रश्नपत्रम् – 3** गुणाः –70

विषयः – साहित्यम् **कोड –C.C.4.2.5** समयः - 11 तः 2 पर्यन्तम्

दिनाङ्कः –12/04/2019 सन्दर्भग्रन्थः – ध्वन्यालोकः चतुर्थोद्योतः

---

**प्रथमान्वितिः (Unit-1)**

**प्रश्नः-1 लोचनटीकानुसारं एकां कारिकां ससन्दर्भं स्पष्टयत।** **05**

(1) अतो ह्यन्यतमेनापि प्रकारेण विभूषिता।
वाणी नवत्वमायाति पूर्वार्थान्वयवत्यपि ॥

(2) दृष्टपूर्वा अपि ह्यर्थाः काव्ये रसपरिग्रहात्।
सर्वे नवा इवाभान्ति मधुमास इव द्रुमाः ॥

**प्रश्नः-2 कवीनां प्रतिभागुणः केन आनन्त्यां प्राप्नोति? कथम्? सविस्तरं वर्णयत।** **10**

**अथवा**

**विवक्षितान्यपरवाच्यध्वन्याश्रयेण काव्यार्थस्य नवत्वं ग्रन्थानुसारं वर्णयत।**

**द्वितीयान्वितिः (Unit-2)**

**प्रश्नः-3 एकां कारिकां ससन्दर्भं स्पष्टयत।** **05**

(1) व्यङ्ग्यव्यञ्जकभावेऽस्मिन्विविधे सम्भवत्यपि।
रसादिमय एकस्मिन्कविः स्यादवधानवान् ॥

(2) ध्वनेरित्थं गुणीभूतव्यङ्ग्यस्य च समाश्रयात्।
न काव्यार्थविरामोऽस्ति यदि स्वात्प्रतिभागुणः ॥

**प्रश्नः-4 आनन्दवर्धनस्य मतानुसारं महाभारतस्य अङ्गीरसं विवेचयत।** **10**

**अथवा**

**शुद्धवाच्यार्थस्य आनन्त्यं कथं सम्भवति? सोदाहरणं स्पष्टयत।**

**तृतीयान्वितिः (Unit-3)**

**प्रश्नः-5 एकां कारिकां ससन्दर्भं स्पष्टयत।** **05**

(1) वाचस्पतिसहस्राणां सहस्रैरपि यत्नतः।
निबद्धापि क्षयं नैति प्रकृतिर्जगतामिव ॥

(2) तत्र पूर्वमनन्यात्म तुच्छात्म तदनन्तरम्।
तृतीयं तु प्रसिद्धात्म नान्यसाम्यं त्यजेत्कविः ॥

**प्रश्नः-6 संवादसन्दर्भे आनन्दवर्धनस्य मतं स्पष्टयत।** **10**

**अथवा**

**संवादस्य भेदान् सविस्तरं लिखत।**

**प्रश्नः-7 एकां कारिकां ससन्दर्भं स्पष्टयत।** **05**

(1) आत्मनोऽन्यस्य सद्भावे पूर्वस्थित्यनुयाय्यपि।
वस्तु भातितरां तन्व्याः शशिच्छायमिवाननम् ॥

(2) अक्षरादिरचनेव योज्यते यत्र वस्तुरचना पुरातनी।
नूतने स्फुरति काव्यवस्तुनि व्यक्तमेव खलु सा न दुष्यति ॥

**प्रश्नः-8 आनन्दवर्धनस्य मतानुसारं सुकविः कदा निन्द्यतां नोपयाति? सविस्तरं वर्णयत।** **10**

**अथवा**

**प्रतायन्तां वाचो निमित्तविविधार्थामृतरसा न सादः कर्तव्यः कविभिरनवद्ये स्वविषये।**

**- इमामुक्तिं ग्रन्थानुसारं विवेचयत।**

## चतुर्थान्वितिः (Unit-4)

**प्रश्नः-9 दशानां लघूत्तराणि लिखत।** **10**

(1) ध्वन्यालोकस्य चतुर्थे उद्योते कानि कानि छन्दांसि प्रयोजितानि सन्ति?

(2) ध्वन्यालोकस्य चतुर्थे उद्योते कति कारिकाः सन्ति ?

(3) आनन्दवर्धनः केन उपाधिना विभूषितः?

(4) रामायणस्य अङ्गीरसः कः?

(5) अविवक्षितवाच्यध्वनेः अपरं नाम किम् ?

(6) आदिकविः कः?

(7) यः प्रथमः प्रथमः स तु तथा हि हतहस्तिबहलपल्लशी। श्वापदगणेषु सिंहः सिंहः केनाधरीक्रियते।- इत्यस्मिन् उदाहरणे कः ध्वनिः?

(8) महाभारतं विवक्षाविषयत्वेन कः पुरुषार्थः सूचितः?

(9) महाभारते कः कीर्त्यते ?

(10) कुम्भसम्भवः मुनिः कः?

(11) संवादः कतिविधः?

(12) किं नाम उक्तिवैचित्र्यम् ?

(13) संवादसन्दर्भे कविः कीदृक् सादृश्यं न त्यजेत्?

(14) कीदृक् वस्तु रम्यं कथ्यते ?

(15) ध्वन्यालोकस्य प्रसिद्धा टीका का ?